
6

# शाकक्षेत्रम्





रूमी शमिः च शाकानि क्षेत्रात् बहिः आनेतुं परस्परं साहाय्यं कृतवन्तौ। द्वौ अपि एकैकं कण्डोलं स्वीकृत्य शाकानि अवचिनुतः । तौ उभौ मिलित्वा आहत्य कति शाकानि बहिः निष्कासितवन्तौ इति पश्यामः।



रूम्याः कण्डोले　　　　शमेः कण्डोले　　　　उभयोः समीपे


क. 7 वार्तक्यः तथा 5 वार्तक्यः मिलित्वा 12 वार्तक्यः भवन्ति।

7 + 5 = ______



ख. एकस्मिन् कण्डोले 9 गृञ्जनकानि अन्यस्मिन् कण्डोले च 4 गृञ्जनकानि सन्ति ।

9 + 4 = ______



ग. एकस्मिन् कण्डोले 8 मूलकानि अन्यस्मिन् कण्डोले च 8 मूलकानि सन्ति।

8 + 8 = _____



## परियोजनाकार्यम्

स्वगृहे, विद्यालये समीपस्थे क्षेत्रे वा कानिचन शाकानां पादपानि रोपयन्तु। स्वमित्रेण सह स्वपरिवारेण सह च स्वस्य अनुभवान् संविभजन्तु, रोपितानां पादपानां पालनं च कुर्वन्तु। भवन्तः वर्धमानानां पादपानां चित्राणि स्वीकर्तुं रचयितुं वा शक्नुवन्ति।

© NCERT not to be republished

## आगच्छन्तु क्रीडाम









© NCERT not to be republished

## दर्शयन्तु यत् भवन्तः एताः सङ्ख्याः *गणनसूत्रे* कथं योजयितुं शक्नुवन्ति ?


13 + 4 =





14 + 5 =



6 + 8 =



5 + 7 =



## कूर्दन्तु योजयन्तु च

| | | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 13 | 14 | 15 | 16 | 17 | 18 | 19 | 20 |

| | |
|---|---|
| 8 + 5 = 13 | 5 + 3 = 8 |
| 13 + 3 = ___ | ___ + ___ = 13 |
| 2 + 16 = ___ | ___ + ___ = 10 |
| 4 + 12 = ___ | ___ + ___ = 18 |

## स्वकीयेन प्रकारेण योजयन्तु

क. स्वप्नायाः समीपे 12,  गौर्याः समीपे च 6 विविधवर्णीयाः अङ्कन्यः सन्ति  । द्वयोः समीपे आहत्य कति अङ्कन्यः सन्ति ?

स्वप्नया 12 तः अग्रे 6 मणयः इतोऽपि गणिताः,

मेलयित्वा च 18 प्राप्तम् ।

12 + 6 = 18




शिक्षकाः संकलनप्रक्रियायाः विषये चर्चां कुर्वन्तु यत् बालकाः कथं 12 गणयन्ति, कथं च तत्र 6 इति योजयन्ति ? बालकैः तत्र प्रयुक्तानां युक्तीनां विषये च चर्चां कुर्वन्तु।



© NCERT not to be republished

गौरी अस्य प्रश्नस्य समाधानम् एवं प्रकारेण अकरोत् -




$$12 \quad + 6$$
$$10 + \underbrace{2 + 6}$$
$$10 + \quad 8 = 18$$

किं भवन्तः एतत् कार्यं भिन्नरूपेण कर्तुं शक्नुवन्ति ? प्रयतन्तु , शिक्षकेन सह चर्चां च कुर्वन्तु।

ख. अमनस्य हस्ते 8 *मोदकानि* सन्ति, चरणजीतः च 6 *मोदकानि* आनीतवान्। अधुना मिलित्वा आहत्य कति *मोदकानि* सन्ति ? ☐



ग. शीनायाः समीपे 12 वलयाः सन्ति, सा स्वभगिन्याः सकाशात् इतोऽपि 6 वलयान् प्राप्तवती। इदानीं तस्याः समीपे कति वलयाः सन्ति ? ☐




## एहि करवाम

विहारयात्रायाः कृते भवन्तः किम् आनेतुम् इच्छन्ति ? मित्रेण सह चर्चां कुर्वन्तु। यानि वस्तूनि विहारयात्रार्थं नेतुम् इच्छन्ति तानि वस्तूनि चित्रयन्तु, प्रदत्तस्थाने च खाद्यपदार्थानां आहत्य संख्यां च लिखन्तु।





© NCERT not to be republished

## व्यवकलनम्

इतोऽपि अन्यसङ्ख्याभिः सह व्यवकलयन्तु।



15 – 9 = 6

| | | | |
|---|---|---|---|
| क. |  16 – 4 = | ख. |  12 – 5 = |
| ग. |  14 – 7 = | घ. |  16 – 6 = |
| ङ. |  15 – 5 = | च. | 15 – 0 = |
| छ. | 17 – 9 = | ज. | 13 – 3 = |

© NCERT not to be republished

## कूर्दन्तु

अञ्जलिः रेणुः च कूर्दन्त्यौ क्रीडतः।




| | | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 13 | 14 | 15 | 16 | 17 | 18 | 19 | 20 |



## एहि करवाम

क्रीडाङ्गणे गृहे वा संख्यापट्टिकां निर्माय भवन्तः एकमेव स्थानं प्राप्तुं भिन्नान् मार्गान् अन्वेषयन्तु ।

### संकलयतु, व्यवकलयतु, मेलयतु च

| | | |
|---|---|---|
| 8 + 7 | 12 | 15 – 3 |
| 9 + 9 | 15 | 18 – 1 |
| 10 + 2 | 14 | 17 – 2 |
| 16 + 1 | 17 | 18 – 0 |
| 11 + 3 | 18 | 16 – 2 |

एतादृशान् अन्यान् प्रश्नान् निर्मान्तु। स्वकीयप्रयुक्तीभिः तेषां प्रश्नानां समाधानार्थं बालकेभ्यः अवसरं यच्छन्तु।



© NCERT not to be republished

## समस्यात्मकाः कथाः

**पेटिकासु स्वस्य उत्तराणि लिखन्तु।**

क. कस्यचित् कुम्भकारस्य समीपे 9 *दीपाः* आसन्। सः 5 *दीपान्* विक्रीतवान्। ततः सः 7 *दीपान्* इतोऽपि निर्मितवान्। अधुना तस्य समीपे आहत्य कति *दीपाः* सन्ति ?



ख. प्रथमे बस्-स्थानके बसयाने 6 बालकाः उपविशन्ति। द्वितीये बस्-स्थानके च 8 बालकाः बसयाने आरोहन्ति। तृतीये बस्-स्थानके 7 बालकाः अवतरन्ति। अधुना तृतीये बस्-स्थानके बसयाने आहत्य कति बालकाः सन्ति?




ग. बस्-याने 18 आसनानि सन्ति। यदि 9 बालकाः पूर्वमेव उपविष्टाः सन्ति तर्हि अधुना बसयानस्य अन्तः कति बालकाः उपवेष्टुं शक्नुवन्ति ?

घ. कुलजीतायाः पेटिकायां 14 चाकलेहाः सन्ति । ततः कतिपयाः चाकलेहाः सा स्वमित्रेभ्यः यच्छति । अधुना तस्याः समीपे 6 चाकलेहाः अवशिष्टा सन्ति । सा स्वमित्रेभ्यः कति चाकलेहान् दत्तवती ?

ङ. रमणः 13 कदलीफलानि प्राप्य तेभ्यः कतिपयानि खादितवान्। अधुना तस्य समीपे 5 कदलीफलानि एव सन्ति । आहत्य सः कति कदलीफलानि खादितवान् ?

© NCERT not to be republished